M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref, / Ser. 1447

Title: Rg-veda Samhita Astaka-4

1447

In Complete

	Rig-Veda Samhita - Ashtak 4 -		Title
			Author
			Editor
810			Year, Vols.
			Publisher
1447		Pages 17 to 57	Remarks

ऋषेर्व्रजंनगावःप्रयताऽअपिग्मन्॥२॥अजातशत्रुमजरास्व
र्वत्यनुस्वधामितादस्ममीयते॥सुनोतनपचतब्रह्मवाहसेपु
रुष्टुतायप्रतरंदधातन॥आयःसोमेनजठरमपिप्रतामंदतम
घवामध्वोऽअंधसः॥यदींमृगायहंतवेमहावधःसहस्रभृ
ष्टिमुशनावधंयमत्॥योऽअस्मैघ्रंसऽउतवायऽऊधनिसो
मंसुनोतिभवतिद्युमाँऽअह॥अपापशक्रस्ततनुष्टिमूहति
तनूशुभ्रंमघवायःकवासखः॥यस्यावधीत्पितरंयस्यमा
तरंयस्यशक्रोभ्रातरंनातऽईषते॥वेतीद्वस्यप्रयतायतंकरो

सं·च·

सि

नाकिल्बिषादीषते वस्व आकरः॥ न पंचभिर्दशभिर्वष्ट्यारभं नासु
न्वता सचते पुष्यता चन॥ जिनाति वेदमुया हंति वा धुनिरा देव
युं भजति गोमति व्रजे॥ वित्वक्षणः समृतौ चक्रमासजो सु
न्वतो विषुणः सुन्वतो वृधः॥ इंद्रो विश्वस्य दमिता विभीषणो
यथावशं नयति दासमार्यः॥ समीं पणेरजति भोजनं मुषे
विदाशुषे भजति सूनरं वसु॥ दुर्गे चन ध्रियते विश्व आपुरु
जनो यो अस्य तविषीमचुक्रुधत्॥ संयज्जनौ सुधनौ विश्वश
र्द्धसाववेदिंद्रो मघवा गोषु शुभ्रिषु॥ युजं ह्यन्यमकृत प्रवेप ॥१८॥

नीमुदीं गव्यं सृजते सत्वभिर्धुनिः॥ सहस्रसामाग्निवेशिं गृणीषे श
त्रिमग्न उपमां केतुमर्यः॥ तस्मा आपः संयतः पीपयंत तस्मिन्क्ष
त्रममवत्त्वेषमस्तु॥४॥ यस्ते साधिष्ठोवस इंद्र क्रतुष्टमाभर॥
अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरं॥ यदिंद्र ते चतस्रो य
च्छूर संति तिस्रः॥ यद्वा पंच क्षितीनामवस्तत्सु न आभर॥ आ ते
वो वरेण्यं वृषंतमस्य हूमहे॥ वृषजूतिर्हि जज्ञिष आभूभिरिं
द्र तुर्वणिः॥ वृषा ह्यसि राधसे जज्ञिषे वृष्णि ते शवः॥ स्वक्ष
त्रं ते धृषन्मनः सत्राहमिंद्र पौंस्यं॥ त्वं तमिंद्र मर्त्यममित्रयंत

सं॰ च॰ मद्रिवः ॥ सर्वरथा शतक्रतो नि याहि शवसस्पते ॥ ५ ॥ त्वामि
द्वृत्रहंतम जनासो वृक्तबर्हिषः ॥ उग्रं पूर्वीषु पूर्व्यं हवंते वाजसा
तये ॥ अस्माकमिंद्र दुष्टरं पुरोयावानमाजिषु ॥ सयावा
नं धनेधने वाजयंतमवा रथं ॥ अस्माकमिंद्रेहि नो
रथमवा पुरंध्या ॥ वयं शविष्ठ वार्यं दिवि श्रवो दधीमहि
दिवि स्तोमं मनामहे ॥ ६ ॥ स आ गमदिंद्रो यो वसूनां
चिकेतद्दातुं दामनो रयीणां ॥ धन्वचरो न वंसगस्तृषा
णश्चकमानः पिबतु दुग्धमंशुं ॥ आ ते हनू हरिवः शूर शि ॥ १९ ॥

प्रे रुहत्सोमो न पर्वतस्य पृष्ठे ॥ अनु त्वा राजन्नर्वतो न हिन्वन्गीर्भिर्मदेम
पुरुहूत विश्वे ॥ चक्रं न वृत्तं पुरुहूत वेपते मनो भिया मे अमतेरिदद्रि
वः ॥ रथादधि त्वा जरिता सदावृध कुविन्नु स्तोषन्मघवन्पुरूवसुः ॥ ए
ष ग्रावेव जरिता त इंद्रेयर्ति वाचं बृहदाशुषाणः ॥ प्र सव्येन मघवन्यं
सि रायः प्र दक्षिणिद्धरिवो मा वि वेनः ॥ वृषा त्वा वृषणं वर्धतु द्यौर्वृषा
वृषभ्यां वहसे हरिभ्यां ॥ स नो वृषा वृषरथः सुशिप्र वृषक्रतो वृषा वज्रि
न्भरे धाः ॥ यो रोहितौ वाजिनौ वाजिनीवान्त्रिभिः शतैः सचमानावदि
ष्ट ॥ यूने समस्मै क्षितयो नमंतां श्रुतरथाय मरुतो दुवोया ॥ ७ ॥ सं भा

ऋ·च· नुनायततेस्य र्यस्याजुष्टानो घृतपृष्ठं स्वं चां॥ तस्मा अग्न धा उषसो व्युष्टाव्य
इंद्राय सुनवामेत्याह॥ समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावा सुतसोमो
जराते ग्रावाणो यस्येषिरं वदंत्ययदध्वर्युर्हविषाव सिंधुं॥ वधूरियं पति
मिच्छंत्येति य ईं वहाते महिषीमिषिरां॥ आस्य श्रवस्याद्रथ आ च घोषा
त्पुरू सहस्रा परिवर्त्तयाते॥ न स राजा व्यथते यस्मिन्निंद्रस्तीव्रं सोमं पिब
ति गोसखायं॥ आसत्वनैरजति हंति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन्॥
पुष्यात्क्षेमे अभि योगे भवात्युभे वृतौ संयती सं जयाति॥ प्रियः सूर्ये प्रि ॥६९॥
यो अग्ना भवाति य इंद्राय सुतसोमो ददाशत्॥८॥ उरोष्ट इंद्र राध

सो विभ्वी रातिः शतक्रतो॥ अधा नो विश्वचर्षणे द्युम्ना सुक्षत्र मंहय॥ यदीमिंद्र
श्रवाय्यमिषं शविष्ठ दधिषे॥ पप्रथे दीर्घश्रुत्तमं हिरण्यवर्ण दुष्टरं॥ शुष्मासो
ये ते अद्रिवो मेहना केतसापः॥ उभा देवावभिष्टये दिवश्च ग्मश्च राजथः॥ उतो
नो अस्य कस्य चिद्दक्षस्य तव वृत्रहन्॥ अस्मभ्यं नृम्णमा भरास्मभ्यं नृमण
स्यसे॥ नू त आभिरभिष्टिभिस्तव शर्मञ्छतक्रतो॥ इंद्र स्याम सुगोपाः
शूर स्याम सुगोपाः॥९॥ यदिंद्र चित्र मेहनास्ति त्वादातमद्रिवः॥ राधस्तन्नो
विदद्वस उभयाहस्त्या भर॥ यन्मन्यसे वरेण्यमिंद्र द्युक्षं तदा भर॥ विद्या
म तस्य ते वयमकूपारस्य दावने॥ यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत्॥

सं॰ च तेनदूक्षाचिददद्रिवः आवाजंदर्षिसातये॥मंहिष्ठंवोमघोनांराजानंच
र्षणीनां॥इंद्रमुपप्रशस्तयेपूर्वीभिर्जुजुषेगिरः॥अस्माइत्काव्यंवच
उक्थमिंद्रायशंस्यं॥तस्माउब्रह्मवाहसेगिरोवर्द्धंत्यत्रयोगिरःशुंभं
त्यत्रयः॥१०॥आयाह्यद्रिभिःसुतंसोमंसोमपतेपिब॥वृषन्निंद्रवृ
षभिर्वृत्रहंतम॥वृषाग्रावावृषामदोवृषासोमोअयंसुतः॥वृषन्निं
०॥वृषात्वावृषणंहुवेवज्रिंचित्राभिरूतिभिः॥वृषन्निं०॥ऋजीषी
३३२ वज्रीवृषभस्तुराषाट्छुष्मीराजावृत्रहासोमपावायुक्त्वाहरिभ्यामु ॥२०॥
पयासदर्वाङ्माध्यंदिनेसवनेमत्सदिंद्रः॥यत्त्वासूर्यस्वर्भानुस्तम

साविध्यदासुरः॥अक्षेत्रविद्यथामुग्धोभुवनान्यदीधयुः॥११॥स्व
र्भानोरधयदिंद्रमायाअवोदिवोवर्त्तमानाः अवाहन्॥गूळ्हंसूर्यं
तमसापव्रतेनतुरीयेणब्रह्मणाविंददत्रिः॥मामामिमंतवसंतमत्र
इरस्याद्रुग्धोभियसानिगारीत्॥त्वंमित्रोऽअसिसत्यराधा
स्तौमेहावतंवरुणश्चराजा॥ग्राव्णोब्रह्मायुयुजानःसपर्यन्कीरि
णादेवान्नमसोपशिक्षन्॥अत्रिःसूर्यस्यदिविचक्षुराधात्स्वर्भा
नोरपमायाःअघुक्षत्॥यंवैसूर्यंस्वर्भानुस्तमसाविध्यदासुरः॥
अत्रयस्तमन्वविंदन्नह्यन्येऽअशक्नुवन्॥१२॥कोनुवांमित्रा

सं॰ च वरुणा ऋतायन्दिवो वा महः पार्थिवस्य वा दे ॥ ऋतस्य वा सदसि त्रासीथां
नो यज्ञायते वा पशुषो न वाजान् ॥ ते नो मित्रो वरुणो अर्यमायुरिंद्र ऋ
भुक्षा मरुतो जुषंत ॥ नमोभिर्वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हु
षे सजोषाः ॥ आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन्रथ्यस्य पुष्टौ ॥
उत वा दिवो असुराय मन्म प्रांधांसीव यज्यवे भरध्वं ॥ प्र सक्षणो दि
व्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः ॥ पूषा भगः प्रभृथे
विश्वभोजा आजिं न जग्मुराश्वश्वतमाः ॥ प्र वो रयिं युक्ताश्वं भ ॥२६॥
रध्वं राय एषेऽवसे दधीत धीः ॥ सुशेव एवैरौशिजस्य होता ये व

एवा मरुत स्तुराणां ॥१३॥ प्र वो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनि
तारमर्कैः ॥ इषुध्यव ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धि
ये धुः ॥ उप व एषे वंद्येभिः शूषैः प्र यह्वी दिवश्चितयद्भिरर्कैः ॥ उ
षासानक्ता विदुषीव विश्वमा हा वहतो मर्त्याय यज्ञं ॥ अभि वो अ
र्चे पोष्यावतो नॄन्वास्तोष्पतिं त्वष्टारं रराणः ॥ धन्या सजोषा धि
षणा नमोभिर्वनस्पतींरोषधी राय एषे ॥ तुजे नस्तने पर्वताः सं
तु स्वैतवो ये वसवो न वीराः ॥ पनित आप्त्यो यजतः सदा नो वर्धा
न्नः शंसं नर्यो अभिष्टौ ॥ वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो न

सं·च· पातमपां सुवृक्ति॥ गृणीतेऽ अग्निरेतरी न शूषैः शोचिष्केशो नि रि
णाति वना॥१४॥ कथा महे रुद्रियाय ब्रवाम कद्राये चिकितुषे भगा
य॥ आपु ओषधीरुत नोऽवंतु द्यौर्वना गिरयो वृक्षकेशाः॥ शृणोतु
नऽऊर्जां पतिर्गिरः स नभस्तरीयाँऽइषिरः परिज्मा॥ शृण्वंत्वापः
पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः॥ विदा चिन्नु महांतो ये
वऽएवा ब्रवाम दस्मा वार्यं दधानाः॥ वयश्चन सुभ्व१ आव यंति
क्षुभा मर्तमनुयतं वधस्नैः॥ आ दैव्यानि नि पार्थिवानि जन्मा ॥२२॥
पश्चाच्छा सुमखाय वोचं॥ वर्द्धंतां द्यावो गिरश्चंद्राग्रा उदा

वर्धंतामभिषाता अर्णाः॥ पदेपदे मे जरिमा नि धायि वरूत्री वा शक्रा या पायुभिश्च॥ सि
षक्तु माता मही रसा नः स्मत्सूरिभिर्ऋजुहस्त ऋजुवनिः॥१५॥ कथा दाशेम नमसा सु
दानूनेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ॥ मा नो हिर्बुध्न्यो रिषे धादस्मा
कं भूदुपमातिवनिः॥ इति चिन्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ देवासो व
नते मर्त्यो वः॥ अत्रा शिवां तन्वो धासिमस्या जरां चिन्मे निरृतिर्जग्रसीत॥ तां वो दे
वाः सुमतिमूर्जयंतीमिषमश्याम वसवः शसा गोः॥ सा नः सुदानुर्मृळयंती देवी प्र
तिद्रवंती सुविताय गम्याः॥ अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु॥ उ भि
र्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः॥ सिषक्तु न ऊर्जव्यस्य पुष्टेः॥१६॥

सं॰ च॰ प्रशांतमा वरुणं दीधिती गीर्भिर्मित्रं भगमदितिं नूनमश्याः॥ पृषद्योनिः पंचहोता शृणो
त्वतूर्तपंथा असुरो मयोभुः॥ प्रति मे स्तोममदितिर्जगृभ्यात्सूनुं न माता हृद्यं सुशेवं
॥ ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु॥ उदीरय कवितमं कवीना
मुनत्तैनमभि मध्वा घृतेन॥ स नो वसूनि प्रयता हितानि चंद्राणि देवः सविता सुवाति॥ रि
समिंद्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्ति॥ सं ब्रह्मणा देवहितं यद
स्ति सं देवानां सुमत्या यज्ञियानां॥ देवो भगः सविता रायो अंश इंद्रो वृत्रस्य संजि २३
तो धनानां॥ ऋभुक्षा वाज उत वा पुरंधिरवंतु नो अमृतासस्तुरासः॥१७॥ मरुत्वतो
अप्रतीतस्य जिष्णोरजूर्यतः प्र ब्रवामा कृतानि॥ न ते पूर्वे मघवन्नापरासो न वी

र्यं१ नूतनः कश्चनाप॥ उप स्तुहि प्रथमं रत्नधेयं बृहस्पतिं सनितारं धनानां॥
यः शंसते स्तुवते शंभविष्ठः पुरूवसुरागमज्जोहुवानं॥ तवोतिभिः सचमाना अ
रिष्टा बृहस्पते मघवानः सुवीराः॥ ये अश्वदा उत वा संति गोदा ये वस्त्रदाः सुभगा
स्तेषु रायः॥ विसर्माणं कृणुहि वित्तमेषां ये भुंजते अपृणंतो न उक्थैः॥ अपव्रता
न्प्रसवे वावृधानान्ब्रह्मद्विषः सूर्याद्यावयस्व॥ य ओहते रक्षसो देववीतावचक्रे
भिस्तं मरुतो नि यात॥ यो वः शमीं शशमानस्य निंदात्तुच्छ्यान्कामान्करते सिष्वि
दानः॥१८॥ तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य॥ यक्ष्वा म
हे सौमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य॥ दमूनसो अपसो ये सुहस्ता वृष्णः

सं॰च॰ पत्नीर्देव्योविभ्वतष्टाः॥सरस्वतीबृहद्दिवोतराकादशस्यंतीर्वरिवस्यंतुशुभ्राः॥प्रसूमहेसु
शरणायमेधांगिरंभरेनव्यसींजायमानां॥यआहनादुहितुर्वक्षणासुरूपामिनानोअकृ
णोदिदंनः॥प्रसुष्टुतिःस्तनयंतंरुवंतमिळस्पतिंजरितर्नूनमश्याः॥योअब्दिमाँउदनि
मांइयर्तिप्रविद्युतारोदसीउक्षमाणः॥एषस्तोमोमारुतंशर्धोअच्छारुद्रस्यसूनूँर्युवन्यूँ
रुदश्याः॥कामोरायेहवतेमास्वस्त्युपस्तुहिपृषदश्वाँअयासः॥प्रैषस्तोमःपृथिवी
मंतरिक्षंवनस्पतीँरोषधीरायेअश्याः॥देवोदेवःसुहवोभूतुमह्यंमानोमातापृथिवी
दुर्मतौधात्॥उरौदेवाअनिबाधेस्याम॥समश्विनोरवसानूतनेनमयोभुवासुप्रणी २४
तीगमेम॥आनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानि॥१९॥आधेन

वःपयसातूर्ण्यर्थाअमर्धंतीरुपनोयंतुमध्वा॥महोरायेबृहतीःसप्तविप्रोमयोभुवोजरि
ताजोहवीति॥आसुष्टुतीनमसावर्तयध्यैद्यावावाजायपृथिवीअमृध्रे॥पितामाता
मधुवचाःसुहस्ताभरेभरेनोयशसावविष्टां॥अध्वर्यवश्चकृवांसोमधूनिप्रवायवे
भरतचारुशुक्रं॥होतेवनःप्रथमःपाह्यस्यदेवमध्वोररिमातेमदाय॥दशक्षिपोयुंज
तेबाहूअद्रिंसोमस्ययाशमितारासुहस्ता॥मध्वोरसंसुगभस्तिर्गिरिष्ठांचनिश्च
दद्दुदुहेशुक्रमंशुः॥असावितेजुजुषाणायसोमःक्रत्वेदक्षायबृहतेमदाय॥हरी
रथेसुधुरायोगेअर्वागिंद्रप्रियाकृणुहिहूयमानः॥२०॥आनोमहीमरमतिंसजो
षाग्नांदेवीनमसारातहव्यां॥मध्वोमदायबृहतीमृतज्ञामाग्नेवहपथिभिर्देवयानैः॥

सं·व०

अंजंतियंप्रथयंतोनविप्रावपावंतंनाग्निनातपंतः॥पितुर्नपुत्रउपसिप्रेष्ठआघ
र्मोअग्निमृतयन्नसादि॥अछामहीबृहतीशंतमागीर्दूतोनगंत्वश्विनाहुवध्यै॥
मयोभुवासरथायातमर्वाग्गंतंनिधिंधुरमाणिर्ननाभिं॥प्रतव्यसोनमउक्तिंतु
रस्याहंपूष्णउतवायोरदिक्षि॥याराधसाचोदितारामतीनांयावाजस्यद्रविणो
दाउतत्मन्॥आनामभिर्मरुतोवक्षिविश्वानारूपेभिर्जातवेदोहुवानः॥यज्ञं
गिरोजरितुःसुष्टुतिंचविश्वेगंतमरुतोविश्वऊती॥२१॥आनोदिवोबृहतः
पर्वतादासरस्वतीयजतागंतुयज्ञं॥हवंदेवीजुजुषाणाघृताचीशग्मांनोवाच २५
मुशतीशृणोतु॥आवेधसंनीलपृष्ठंबृहंतंबृहतिंसदनेसादयध्वं॥सादद्यो

स्प

न

निंदमऽआदीदिवांसंहिरण्यवर्णमरुषंसपेम॥आधर्णसिर्बृहद्दिवोररा
णोविश्वेभिर्गंत्वोमभिर्हुवानः॥ग्नावसानओषधीरमृध्रस्त्रिधातुशृंगोवृष
भोवयोधाः॥मातुष्पदेपरमेशुक्रऽआयोर्विपन्यवोरास्पिरासोऽअग्मन्॥
सुशेव्यंनमसारातहव्याःशिशुंमृजंत्यायवोनवासे॥बृहद्वयोबृहतेतु
भ्यमग्नेधियाजुरोमिथुनासःसचंत॥देवोदेवः०॥उरोदे०॥समश्वि०॥
आनो०॥२२॥तंप्रत्नथापूर्वथाविश्वथेमथाज्येष्ठतातिंबर्हिषदंस्वर्विदं॥
प्रतीचीनंवृजनंदोहसेगिराशुंजयंतमनुयासुवर्द्धसे॥श्रियेसुदृशीरुपर
स्ययास्स्वर्विरोचमानःककुभामचोदते॥सुगोपाअसिनदभायसुक्रतोपरो

मु

सं. ४. मायाभिर्ऋत आस नाम ते॥ अत्यं हविः सचते सच्च धातु चारिष्टगातुः स होता
सहोभरिः॥ प्रसर्स्राणो अनु बर्हिर्वृषा शिशुर्मध्ये युवाजरो विस्रुहा हितः॥ प्र
व एते सुयुजो यामन्निष्टये नीचीरमुष्मै यम्य ऋतावृधः॥ सुयन्तुभिः सर्व
शासैरभीशुभिः क्रिविर्नामानि प्रवणे मुषायति॥ संजर्भुराणस्तरुभिः
सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः॥ धारवाकेष्वृजुगाथ शोभसे व
र्धस्व पत्नीरभि जीवो अध्वरे॥ २३॥ यादृगेव ददृशे तादृगुच्यते सं छाय २६
यया दधिरे सिध्रयाप्स्वा॥ महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरम
नपच्युतं सहः॥ वेत्यग्रुर्जनिवान्वा अति स्पृधः समर्यता मनसा सूर्यः कविः॥

घर्मं रक्षन्तं परि विश्वतो गयमस्माकं शर्म वनवत्स्वावसुः॥ ज्यायांसमस्य यतुनस्य के
तुन ऋषिस्वरं चरति यासु नाम ते॥ यादृश्मिन्धायि तमपस्यया विदद्य उ स्वयं वहते
सो अरं करत्॥ समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता॥
अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विद्यते पूतबन्धनी॥ स हि क्षत्रस्य मनस
स्य चित्तिभिरेवावदस्य यजतस्य सध्रेः॥ अवत्सारस्य स्पृणवाम रण्वभिः शवि
ष्ठं वाजं विदुषा चिदर्ध्यं॥ २४॥ श्येन आसामदितिः कक्ष्यो मदो विश्ववारस्य
यजतस्य मायिनः॥ समन्यमन्यमर्थयन्त्येतवे विदुर्विषाणं परिपानमन्ति ते॥
सदापृणो यजतो वि द्विषो वधीद्बाहुवृक्तः श्रुतवित्तर्यो वः सचा॥ उभा स वरा प्र

सं.च. त्येति भाति च यदीं गणं भजते सुप्रयावभिः ॥ सुतंभरो यजमानस्य सत्पतिर्विश्वासा
मूधः स धियामुदंचनः ॥ भरद्धेनू रसवच्छिश्रिये पयोनुब्रुवाणो अध्येति न स्वपन् ॥
यो जागार तमृचः कामयंते यो जागार तमु सामानि यंति ॥ यो जागार तमयं सोम आ
ह तवाहमस्मि सख्ये न्योकाः ॥ अग्निर्जागार तमृचः कामयंतेग्निर्जागार तमु
सामानि यंति ॥ अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ॥ २५ ॥
विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः ॥ अपावृत व्रजिनीरुत्स्व
र्गाद्वि दुरो मानुषीर्देव आवः ॥ वि सूर्यो अमतिं न श्रियं सादोर्वाद्गवां माता जानती २७
गात् ॥ धन्वर्णसो नद्यः खादोअर्णाः स्थूणेव सुमिता दृंहत द्यौः ॥ अस्मा उक्थाय

पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ॥ वि पर्वतो जिहीत साधत द्यौराविवासंतो दस
भि यंत भूम ॥ सूक्तेभिर्वो वचोभिर्देवजुष्टैरिंद्रा न्वग्नी अवसे हुवध्यै ॥ उक्थेभिर्हि ष्मा
कवयः सुयज्ञा आविवासंतो मरुतो यजंति ॥ एतो न्वद्य सुध्यो भवाम प्र दुच्छुना
मिनवामा वरीयः ॥ आरे द्वेषांसि सनुतर्दधामायाम प्रांचो यजमानमच्छ ॥ २६ ॥ ए
ता धियं कृणवामा सखायोप या माता ऋणुत व्रजं गोः ॥ यया मनुर्विशिशिप्रं जिगा
य यया वणिग्वंकुरापा पुरीषं ॥ अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दश मासो न
वग्वाः ॥ ऋतं यती सरमा गा अविंदद्विश्वानि सत्यांगिराश्चकार ॥ विश्वे अस्या व्यु
षि माहिनायाः सं यद्गोभिरंगिरसो नवंत ॥ उत्स आसां परमे सधस्थ ऋतस्य प

स॰च॰ थासरमाविद्गाः॥ आसूर्योयातुसप्ताश्वःक्षेत्रंयदस्योर्वियादीर्घयाथे॥ रघुःश्येनः
पतयदंधोअछायुवाकविर्दीदयद्गोषुगछन्॥ आसूर्योअरुहछुक्रमर्णोयुक्तय
द्धरितोवीतपृष्ठाः॥ उद्नाननावमनयंतधीराआशृण्वतीरापोअर्वागतिष्ठन्॥
धियंवोअप्सुदधिषेस्वर्षांययातरंदशमासोनवग्वाः॥ अयाधियास्यामदेवगो
पाअयाधियातुतुर्यामात्यंहः॥२७॥ हयोनविद्वांअयुजिस्वयंधुरितांवहामि
प्रतरणीमवस्युवं॥ नास्यावश्मिविमुचंनावृतंपुनर्विद्वान्पथःपुरएतऋजु
नेषति॥ अग्नइंद्रवरुणमित्रदेवाःशर्धःप्रयंतमारुतोतविष्णो॥ उभानासत्या २८
रुद्रोअधग्नाःपूषाभगःसरस्वतीजुषंत॥ इंद्राग्नीमित्रावरुणादितिंस्वःपृथि

वीद्यांमरुतःपर्वतांअपः॥ हुवेविष्णुंपूषणंब्रह्मणस्पतिंभगंनुशंसंसवितारमूतये॥ उतनो
विष्णुरुतवातोअस्रिधोद्रविणोदाउतसोमोमयस्करत्॥ उतऋभवउतरायेनोअश्वि
नोतत्वष्टोतविभ्वानुमंसते॥ उतत्यन्नोमारुतंशर्धआगमद्दिविक्षयंयजतंबर्हिरा
सदे॥ बृहस्पतिःशर्मपूषोतनोयमद्वरूथ्यंवरुणोमित्रोअर्यमा॥ उतत्येनःपर्वतासः
सुशस्तयःसुदीतयोनद्यस्त्रामणेभुवन्॥ भगोविभक्ताशवसावसागमदुरुव्यचा
अदितिःश्रोतुमेहवं॥ देवानांपत्नीरुशतीरवंतुनःप्रावंतुनस्तुजयेवाजसातये॥ याः
पार्थिवासोयाअपामपिव्रतेतानोदेवीःसुहवाःशर्मयछ॥ उतग्नाव्यंतुदेवपत्नीरिंद्रा त॥
ण्यग्नाय्यश्विनीराट्॥ आरोदसीवरुणानीशृणोतुव्यंतुदेवीर्यऋतुर्जनीनां॥२८॥

सं.च. इति चतुर्थाष्टक संहितायां द्वितीयोध्यायः॥ हरिः॥ ओं॥ ॥ प्रयुंजती दिव एति ब्रुवा
णा मही माता दुहितुर्बोधयंती॥ आविवासंती युवतिर्मनीषा पितृभ्य आसदने
जोहुवाना॥ अजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिं॥ अनंता
स उरवो विश्वतः सीं परि द्यावापृथिवी यंति पंथाः॥ उक्षा समुद्रो अरुषः सुपर्णः पू
र्वस्य योनिं पितुराविवेश॥ मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यं
तौ॥ चत्वार ईं बिभ्रति क्षेमयंतो दश गर्भं चरसे धापयंते॥ त्रिधातवः परमा अ
स्य गावो दिवश्चरंति परि सद्यो अंतान्॥ इदं वपुर्निवचनं जनासश्चरंति यन्न
द्यस्तस्थुरापः॥ द्वे यदीं बिभृतो मातुरन्ये इहेह जाते यम्या३ सबंधू॥ वितन्वते धि 29

यो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयंति॥ उपप्रक्षे वृषणो
मोदमाना दिवस्पथा वध्वो यंत्यच्छ॥ तदस्तु मित्रावरुणा तदग्ने
शं योरस्मभ्यमिदमस्तु शस्तं॥ अशीमहि गाधमुत प्रतिष्ठां न
मो दिवे बृहते सादनाय॥ ७॥ कदु प्रियाय धाम्ने मनामहे स्वक्ष
त्राय स्वयशसे महे वयं॥ आमेन्यस्य रजसो यदभ्र आँ अपो वृ
णाना वितनोति मायिनी॥ ता अत्नत वयुनं वीरवक्षणं समान्या
वृतया विश्वमा रजः॥ अपो अपाचीरपरा अपेजते प्र पूर्वाभिस्ति
रते देवयुर्जनः॥ आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा

सं॰व॰ जिघर्ति मायिनि॥ शतं वा यस्य प्रचरन्त्स्वे दमे संवर्तयन्तो वि च वर्तयन्नहा॥ ताम
स्य रीतिं परशोरिव प्रत्यनीकमख्यं भुजे अस्य वर्पसः॥ सचा यदि पितुमन्तमिव
क्षयं रत्नं दधाति भरहूतये विशे॥ स जिह्वया चतुरनीक ऋञ्जते चारु वसानो
वरुणो यतन्नरिं॥ न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यं॥
॥२॥ देवं वो अद्य सवितारमेषे भगं च रत्नं विभजन्तमायोः॥ आ वां नरा पुरुभुजा
ववृत्यां दिवेदिवे चिदश्विना सखीयन्॥ प्रति प्रयाणमसुरस्य विद्वान्त्सूक्तैर्देवं
सवितारं दुवस्य॥ उप ब्रुवीत नमसा विजानन्ज्येष्ठं च रत्नं विभजन्तमायोः॥ अ ३०
दत्रया दयते वार्याणि पूषा भगो अदितिर्वस्त उस्रः॥ इन्द्रो विष्णुर्वरुणो मित्रो अ

ग्निरहानि भद्रा जनयन्त दस्माः॥ तन्नो अनर्वा सविता वरूथं तत्सिन्धव इषयन्तो अनु
ग्मन्॥ उप यद्वोचे अध्वरस्य होता रायः स्याम पतयो वाजरत्नाः॥ प्र ये वसुभ्य ईवदा
नमो दुर्ये मित्रे वरुणे सूक्तवाचः॥ अवैत्वभ्वं कृणुता वरीयो दिवस्पृथिव्योरवसा
मदेम॥३॥ विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यं॥ विश्वो राय इषुध्यति द्युम्नं वृणी
त पुष्यसे॥ ते ते देव नेतर्ये चेमाँ अनुशसे॥ ते राया ते ह्याऽपृचे सचेमहि सचथ्यैः॥
अतो न आ नॄनतिथीनतः पत्नीर्दशस्यत॥ आरे विश्वं पथेष्ठां द्विषो युयोतु यूयुविः॥
यत्र वह्निरभिहितो दुद्रवद्द्रोण्यः पशुः॥ नृमणा वीरपस्त्योऽर्णा धीरेव सनिता॥ ए
ष ते देव नेता रथस्पतिः शं रयिः॥ शं राये शं स्वस्तय इषस्तुतो मनामहे देवस्तुतो मना

सं॰ च॰

महे॥४॥ अग्नेसुतस्यपीतयेविश्वैरूमेभिरागहि॥ देवेभिर्हव्यदातये॥ ऋतधीयआ
गतसत्यधर्माणोअध्वरं॥ अग्नेःपिबतजिह्वया॥ विप्रेभिर्विप्रसंत्यप्रातर्यावभिराग हि
हि॥ देवेभिःसोमपीतये॥ अयंसोमश्चमूसुतोमत्रेपरिषिच्यते॥ प्रियइंद्रायवाय वे ३ ते
वे॥ वायवायाहिवीतयेजुषाणोहव्यदातये॥ पिबासुतस्यांधसोअभिप्रयः॥५॥
इंद्रश्चवायवेषांसुतानांपीतिमर्हथः॥ तान्जुषेथामरेपसावभिप्रयः॥ सुता
इंद्रायवायवेसोमासोदध्याशिरः॥ निम्नंनयंतिसिंधवोभिप्रयः॥ सजूर्विश्वेभि
र्देवेभिरश्विभ्यामुषसासजूः॥ आयाह्यग्नेअत्रिवत्सुतेरण॥ सजूर्मित्रावरुणा ३१ गाय
भ्यांसजूःसोमेनविष्णुना॥ आया॰॥ सजूरादित्यैर्वसुभिःसजूरिंद्रेणवायुना॥ आ॰॥६॥

स्वस्तिनोमिमीतामश्विनाभगःस्वस्तिदेव्यदितिरनर्वणः॥ स्वस्तिपूषाऽअसुरोदधातु
नःस्वस्तिद्यावापृथिवीसुचेतुना॥ स्वस्तयेवायुमुपब्रवामहेसोमंस्वस्तिभुवनस्यय
स्पतिः॥ बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयऽआदित्यासोभवंतुनः॥ विश्वेदेवानोऽअ
द्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तये॥ देवाऽअवंत्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपा
त्वंहसः॥ स्वस्तिमित्रावरुणास्वस्तिपथ्येरेवति॥ स्वस्तिनऽइंद्रश्चाग्निश्चस्वस्तिनो
ऽअदितेकृधि॥ स्वस्तिपंथामनुचरेमसूर्याचंद्रमसाविव॥ पुनर्ददताघ्नताजानता
संगमेमहि॥ स्वस्त्ययनंतार्क्ष्यमरिष्टनेमिंमहद्भूतंवायसंदेवतानां॥ असुरघ्नमिंद्रस
खंसमत्सुबृहद्यशोनावमिवारुहेम॥ अंहोमुचमांगिरसंगयंचस्वस्त्यात्रेयंमनसा

सं॰व॰ चतार्क्ष्यं॥ प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयन्नोऽअस्तु॥७॥ प्रश्या
वाश्व धृष्णुयार्चा मरुद्भिरृक्वभिः॥ येऽअद्रोघमनुष्वधंश्रवो मदंति यज्ञियाः॥१॥ ते
ते हि स्थिरस्य शवसः सखायः संति धृष्णुया॥ ते यामन्ना धृषद्विनस्त्मना पांति शश्वत
॥ ते स्पंद्रासो नोक्षणोऽति ष्कंदंति शर्वरीः॥ मरुतामधा महो दिवि क्षमा च मन्महे॥ मरु
त्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया॥ विश्वे ये मानुषा युगा पांति मर्त्यं रिषः॥ अर्हंतो ये
सुदानवो नरोऽअसामिशवसः॥ प्र यज्ञं यज्ञियेभ्यो दिवोऽअर्चा मरुद्भ्यः॥८॥ आरुक्मै
रायुधा नरऽऋष्वाऽऋष्टीरसृक्षत॥ अन्वेनाँऽअह विद्युतो मरुतो जज्झतीरिव भानुरर्त
त्मना दिवः॥ ये वावृधंत पार्थिवा यऽउरावंतरिक्षऽआ॥ वृ
जने वा नदीनां सधस्थे वा महो दिवः॥ शर्धो मारुतमुच्छंस सत्यशव ॥२२॥

स मृभ्वसं॥ उत स्म ते शुभे नरः प्र स्यंद्रा युजत त्मना॥ उत स्म ते परुष्ण्या
मूर्णा वसत शुंध्यवः॥ उत पव्या रथानामद्रिं भिंदंत्योजसा॥ आपथ
यो विपथयोंऽतस्पथाऽअनुपथाः॥ एतेभिर्मह्यं नामभिर्यज्ञं विष्टा
रऽओहते॥१॥ अधा नरो न्योहते धा नियुतऽओहते॥ अधा रापा ३
वताऽइति चित्रा रूपाणि दर्श्या॥ छंदःस्तुभः कुभन्यवऽउत्स
माकीरिणो नृतुः॥ ते मे के चिन्न तायवऽऊमाऽआसन् दृशि त्वि
षे॥ यऽऋष्वाऽऋष्टिविद्युतः कवयः संति वेधसः॥ तमृषे मा
रुतं गणं नमस्या रमया गिरा॥ अच्छऽऋषे मारुतं गणं दाना

सं.च.

मित्रंनयोषणा॥ दिवोवाधृष्णव॰ ओजसास्तुताधीभिरिषण्यत॥
नूमन्वानऽएषांदेवाँऽअच्छानवक्षणा॥ दानासचेतसूरिभिर्या
मश्रुतेभिरंजिभिः॥ प्रयेमेबंध्वेषेगांवोचंतसूरयः पृश्निंवोचं
तमातरं॥ अधापितरमिष्मिणंरुद्रंवोचंतशिक्वसः॥ सप्तमे
सप्तशाकिनऽएकमेकाशताददुः॥ यमुनायामधिश्रुतमुद्रा
धोगव्यंमृजेनिराधोऽअश्व्यंमृजे॥१०॥ कोवेदजानमेषांको
वापुरासुम्नेष्वासमरुतां॥ यद्युयुज्रेकिलास्यः॥ ऐतान्रथे
षुतस्थुषः कःशुश्रावकथाययुः॥ कस्मैसस्रुःसुदासेऽअन्वा ॥२३॥

पयऽइळाभिर्वृष्टयःसह॥ तेमऽआहुर्यऽआययुरुपद्युभिर्विभिर्मदे॥ नरो
मर्याऽअरेपसऽइमान्पश्यन्नितिष्टुहि॥ येऽअंजिषुयेवाशीषुस्वभान
वःस्रक्षुरुक्मेषुखादिषु॥ श्रायारथेषुधन्वसु॥ युष्माकंस्मारथाँऽअ
नुमुदेदधेमरुतोजीरदानवः॥ वृष्टीद्यावोयतीरिव॥११॥ आयंनरः
सुदानवोददाशुषेदिवःकोशमचुच्यवुः॥ विपर्जन्यंसृजंतिरोदसीऽ
अनुधन्वनायंतिवृष्टयः॥ ततृदानाःसिंधवःक्षोदसारजःप्रसस्रु
र्धेनवोयथा॥ स्यन्नाऽअश्वाऽइवाध्वनोविमोचनेवियद्वर्तंतऽए
न्यः॥ आयातमरुतोदिवऽआंतरिक्षादमादुत॥ मावस्थातपरावतः॥

सं॰ ५॰ मावोरसानितभाकुभाक्रुमुर्मावः सिंधुर्निरीरमत् ॥ मावः परिष्ठात्सरयुः पु
रीषिण्यस्मेऽइत्सुम्नमस्तुवः ॥ तंवः शर्द्धं रथानांत्वेषंगणंमारुतंनव्य
सीनां ॥ अनुप्रयंतिवृष्टयः ॥ १२ ॥ शर्द्धंशर्द्धंवऽएषांव्रातंव्रातंगणंगणं
सुशस्तिभिः ॥ अनुक्रामेमधीतिभिः ॥ कस्माऽअद्यसुजातायरातह
व्यायप्रययुः ॥ एनायामेनमरुतः ॥ येनतोकायतनयायधान्यंबी
जंवहध्वेऽअक्षितं ॥ अस्मभ्यंतद्धत्तनयद्वऽईमहेराधोविश्वायु
सौभगं ॥ अतीयामनिदस्तिरःस्वस्तिभिर्हित्वावद्यमरातीः ॥ वृष्टीशंयोरा ३८
पउस्त्रिभेषजंस्याममरुतःसह ॥ सुदेवःसमहासतिसुवीरोनरोमरुतःसमर्त्यः ॥

यंत्रायधेस्यामते ॥ स्तुहिभोजान्स्तुवतोऽअस्ययामनिरणन्गावोनय
वसे ॥ यतःपूर्वांऽइवसखींरनुह्वयगिरागृणीहिकामिनः ॥ १३ ॥
प्रशर्द्धायमारुतायस्वभानवऽइमांवाचमनजापर्वतच्युते ॥ घर्म
स्तुभेदिवऽआपृष्ठयज्वनेद्युम्नश्रवसेमहिनृम्णमर्चत ॥ प्रवो
मरुतस्तविषाऽउदन्यवोवयोवृधोऽअश्वयुजःपरिज्रयः ॥ सं
विद्युतादधतिवाशतित्रितःस्वरंत्यापोवनापरिज्रयः ॥ विद्युन्म ५६
हसोनरोऽअश्मदिद्यवोवातत्विषोमरुतःपर्वतच्युतः ॥ अब्द
याचिन्मुहुराह्रादुनीवृतस्तनयदमारभसाऽउदोजसः ॥ ५१

क्तून्रुद्राव्य१हानिशिक्वसोव्य१ंतरिक्षंविरजांसिधूतयः॥वि
यदज्राँऽअजथनावऽईंयथाविदुर्गाणिमरुतोनाहरिष्य
थ॥तद्वीर्यंवोमरुतोमहित्वनंदीर्घंततानसूर्योनयोजनं॥ए
तानयामेऽअगृभीतशोचिषोनश्वदांयन्न्ययातनागिरिं॥
॥५॥अभ्राजिशर्धोमरुतोयदर्णसंमोषथावृक्षंकपनेव
वेधसः॥अधस्मानोअरमतिंसजोषसश्चक्षुरिवयंतम
नुनेषथासुगं॥नसजीयतेमरुतोनहन्यतेनस्रेधतिन
व्यथतेनरिष्यति॥नास्यरायउपदस्यंतिनोतयऽऋ ॥२५॥

षिंवायंराजानंवासुषूदथ॥नियुत्वंतोग्रामजितोयथानरोर्यमणोनमरुतःकबंधि
नः॥पिन्वंत्युत्संयदिनासोअस्वरन्व्युंदंतिपृथिवींमध्वोअंधसा॥प्रवत्वतीयंपृथि
वीमरुद्भ्यःप्रवत्वतीद्यौर्भवतिप्रयद्भ्यः॥प्रवत्वतीःपथ्याअंतरिक्ष्याःप्रवत्वंतःप
र्वताजीरदानवः॥यन्मरुतःसभरसःस्वर्णरःसूर्यउदितेमदथादिवोनरः॥नवोश्वाः
श्रथयंताहसिस्रतःसद्योअस्याध्वनःपारमश्नुथ॥१५॥अंसेषुवऋष्टयःपत्सुखा
दयोवक्षःसुरुक्मामरुतोरथेशुभः॥अग्निभ्राजसोविद्युतोगभस्त्योःशिप्राःशीर्ष
सुवितताहिरण्ययीः॥तंनाकमर्योअगृभीतशोचिषंरुशत्पिप्पलंमरुतोविधूनु
थ॥समच्यंतवृजंतित्विषंतयत्स्वरंतिघोषंविततमृतायवः॥युष्मादत्तस्यमरुतो
ना

सं०च० विचेतसोरायःस्यामरथ्योवयस्वतः॥नयोयुछतितिष्योयथादिवो३स्मेरारंतमरु
तःसहस्रिणं॥यूयंरयिंमरुतःस्पार्हवीरंयूयमृषिमवथसामविप्रं॥यूयमर्वंतंभर
तायवाजंयूयंधत्थराजानंश्रुष्टिमंतं॥तद्वोयामिद्रविणंसद्यऊतयोयेनास्वर्ण
ततनामनॄंरभि॥इदंसुमेमरुतो हर्यतावचोयस्यतरेमतरसाशतंहिमाः॥२६॥
प्रयज्यवोमरुतोभ्राजदृष्टयोबृहद्वयोदधिरेरुक्मवक्षसः॥ईयंतेअश्वैःसुयमेः
भिराशुभिःशुभंयातामनुरथाअवृत्सत॥स्वयंदधिध्वेतविषींयथाविदाबृहन्म
हांतउर्वियाविराजथ॥उतांतरिक्षंममिरेव्योजसाशुभं०॥साकंजाताःसुभ्वःसाक ३६
मुक्षिताःश्रियेचिदाप्रतरंवावृधुर्नरः॥विरोकिणःसूर्यस्येवरश्मयःशुभं०॥आ

षे भूषेण्यंवोमरुतोमहित्वनंदिदृक्षेण्यंसूर्यस्येवचक्षणं॥उतोअस्मांअमृतत्वेदधातन
शुभं०॥उदीरयथामरुतःसमुद्रतोयूयंवृष्टिंवर्षयथापुरीषिणः॥नवोदस्राउपदस्यं
तिधेनवःशुभं०॥२७॥यदश्वान्धूर्षुपृषतीरयुग्ध्वंहिरण्ययान्प्रत्यत्कांअमुग्ध्वं॥
विश्वाइत्स्पृधोमरुतोव्यस्यथशुभं०॥नपर्वतानद्योवरंतवोयत्राचिध्वंमरुतोग न
छथेदुतत्॥उतद्यावापृथिवीयाथनापरिशुभं०॥यत्पूर्व्यंमरुतोयच्चनूतनंयदुद्य
तेवसवोयच्चशस्यते॥विश्वस्यतस्यभवथानवेदसःशुभं०॥मृळतनोमरुतोमा
वधिष्टनास्मभ्यंशर्मबहुलंवियंतन॥अधिस्तोत्रस्यसख्यस्यगातनशुभं०॥यूय
मस्मान्नयतवस्योअछानिरंहतिभ्योमरुतोगृणानाः॥जुषध्वंनोहव्यदातिंयज

न्नावयंस्यामपतयोरयीणां॥१८॥अग्नेशर्द्धन्तमागणंपिष्टंरुक्मेभिरंजिभिः॥विशो
अद्यमरुतामवह्वयेदिवश्चिद्रोचनादधि॥यथाचिन्मन्यसेहृदातदिन्मेजग्मुराश
सः॥येतेनेदिष्टंहवनान्यागमन्तान्वर्द्धभीमसंदृशः॥मीळ्हुष्मतीवपृथिवीपराहृ
तामदत्येत्यस्मदा॥ऋक्षोनवोमरुतःशिमीवाँअमोदुध्रोगौरिवभीमयुः॥नियेरि
णंत्योजसावृथागावोनदुर्धुरः॥अश्मानंचित्स्वर्यंपर्वतंगिरिंप्रच्यावयंतिया
मभिः॥उत्तिष्ठनूनमेषांस्तोमैःसमुक्षितानां॥मरुतांपुरुतममपूर्व्यंगवांसर्गमि
वह्वये॥१९॥युङ्ध्वंह्यरुषीरथेयुङ्ध्वंरथेषुरोहितः॥युङ्ध्वंहरीअजिराधुरि ३७
वोळ्हवेवहिष्ठाधुरिवोळ्हवे॥उतस्यवाज्यरुषस्तुविष्वणिरिहस्मधायिदर्शतः॥

मावोयामेषुमरुतश्चिरंकरत्प्रतंरथेषुचोदत॥रथंनुमारुतंवयंश्रवस्युमाहुवामहे॥आ
यस्मिन्तस्थौसुरणानिबिभ्रतीसचामरुत्सुरोदसी॥तंवःशर्द्धंरथेशुभंत्वेषंपनस्युमा
हुवे॥यस्मिन्त्सुजातासुभगामहीयतेसचामरुत्सुमीळ्हुषी॥२०॥आरुद्रासइन्द्रवंतः
सजोषसोहिरण्यरथाःसुवितायगंतन॥इयंवोअस्मत्प्रतिहर्यतेमतिस्तृष्णजेनदिव
उत्सोउदन्यवे॥वाशीमंतऋष्टिमंतोमनीषिणःसुधन्वानइषुमंतोनिषंगिणः॥स्व
श्वास्थसुरथाःपृश्निमातरःस्वायुधामरुतोयाथनाशुभं॥धूनुथद्यांपर्वतान्दाशुषे
वसुनिवोवनाजिहतेयामनोभिया॥कोपयथपृथिवींपृश्निमातरःशुभेयदुग्राःपृ
षतीरयुग्ध्वं॥वातत्विषोमरुतोवर्षनिर्णिजोयमाइवसुसदृशःसुपेशसः॥पिशं

ता २

सं० च० गाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ॥ पुरुद्रप्सा अंजिमंतः सुदा
नवस्त्वेषसंदृशो अनवभ्रराधसः ॥ सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं
नाम भेजिरे ॥ २१ ॥ ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितं ॥ नृ
म्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे ॥ गोमदश्वावद्रथवत्सुवी
रं चंद्रवद्राधो मरुतो ददा नः ॥ प्रशस्तिं नः कृणुत रुद्रियासो भक्षीय वोवसो दैव्यस्य ॥
हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः ॥ सत्यश्रुतः कवयो युवानो ३८
बृहद्गिरयो बृहदुक्षमाणाः ॥ २२ ॥ तमु नूनं तविषीमंतमेषां स्तुषे गणं मारुतं नव्य
सीनां ॥ य आश्वश्वा अमवद्वहंत उतेशिरे अमृतस्य स्वराजः ॥ त्वेषं गणं तवसं खादि

हस्तं धुनिव्रतं मायिनं दातिवारं ॥ मयोभुवो ये ऽमिता महित्वा वंद
स्व विप्र तुविराधसो नॄन् ॥ आ वो यंतूदवाहासो ऽद्य वृष्टिं ये विश्वे म
रुतो जुनंति ॥ अयं यो ऽग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः ॥
यूयं राजानमिर्यं जनाय विभ्वतष्टं जनयथा यजत्राः ॥ युष्मदेति मुष्टिहा
बाहुजूतो युष्मत्सदश्वो मरुतः सुवीरः ॥ अरा इवेदचरमा ऽहेव प्र
प्र जायंते अकवा महोभिः ॥ पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या
मरुतः सं मिमिक्षुः ॥ यत्प्रायासिष्ट पृषतीभिरश्वैर्वीळुपविभिर्मरुतो
रथेभिः क्षोदंत आपो रिणते वनान्यवोस्रियो वृषभः क्रंदतु द्यौः ॥

सं॰ ४॰ प्रथिष्ट यामन्पृथिवी चिदेषां भर्तेव गर्भं स्वमिच्छवो धुः ॥ वातान्ह्यश्वान्धुर्यायु
युज्रे वर्षं स्वेदं चक्रिरे रुद्रियासः ॥ हये नरो ०॥ सत्यश्रुतः ०॥ २३॥ प्र वः स्प
ळक्रन्त्सुविताय दावनेऽर्चा दिवे प्र पृथिव्या ऋतं भरे ॥ उक्षंतेऽश्वान्त
रुषंतऽआ रजोनु स्वं भानुं श्रथयंतेऽर्णवैः ॥ अमादेषां भियसा भू
मिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती ॥ दूरेदृशो ये चितयंतऽएम
भिरंतर्महे विदथे येतिरे नरः ॥ गवामिव श्रियसे शृंगमुत्तमं सू
र्यो न चक्षू रजसो विसर्जने ॥ अत्याऽइव सुभ्व१श्चारवः स्थन ३९
मर्याऽइव श्रियसे चेतथा नरः ॥ को वो महांति महतामुदश्नवत्कस्का

व्या मरुतः को ह पौंस्या ॥ यूयं ह भूमिं किरणं न रेजथ प्र यद्भरध्वे सुविताय
दावने ॥ अश्वाऽइवेदरुषासः सबंधवः शूराऽइव प्रयुधः प्रोत युयुधु
ः॥ मर्याऽइव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्रमिनंति वृष्टिभिः ॥ तेऽ
अज्येष्ठाऽअकनिष्ठासऽउद्भिदो मध्यमासो महसा वि वावृधुः ॥ सुजात
सो जनुषा पृश्निमातरो दिवो मर्याऽआ नोऽअच्छा जिगातन ॥ वयो न
ये श्रेणीः पप्तुरोजसांतान्दिवो बृहतः सानुनस्परि ॥ अश्वासऽएषामु
भये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः ॥ मिमातु द्यौरदितिर्वीतये
नः सं दानुचित्राऽउषसो यतंतां ॥ आचुच्यवुर्दिव्यं कोशमेतऽऋषे रुद्र

सं॰ च॰ स्यमरुतो गणानां॥२४॥ ईळेऽअग्निं स्ववसं नमोभिरिह प्रसत्तो विचयत्कृतं
नः॥ रथैरिव प्रभरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्यां॥ आ ये तस्थुः
पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु॥ वना चिदुग्रा जिहते नि वो भिया
पृथिवी चिद्रेजते पर्वतश्चित्॥ पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित्सा
नु रेजत स्वने वः॥ यत्क्रीळथ मरुतऽऋष्टिमंतऽआपऽइव सध्र्यंचो धवध्वे
॥ वराऽइवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे॥ श्रिये श्रेयांसस्त
वसो रथेषु सत्रा महांसि चक्रिरे तनूषु॥ अज्येष्ठासोऽअकनिष्ठासऽएते सं
भ्रातरो वावृधुः सौभगाय॥ युवा पिता स्वपा रुद्रऽएषां सुदुघा पृश्निः सु ८०

दिना मरुद्भ्यः॥ यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दिवि ष्ठ॥ अतो
नो रुद्राऽउत वा न्व१स्याग्ने वित्ताद्धविषो यद्यजाम॥ अग्निश्च यन्मरुतो वि
श्ववेदसो दिवो वहध्वऽउत्तरादधि ष्णुभिः॥ ते मंदसाना धुनयो रिशाद
सो वामं धत्त यजमानाय सुन्वते॥ अग्ने मरुद्भिः शुभयद्भिरृक्वभिः
सोमं पिब मंदसानो गणश्रिभिः॥ पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वा
नर प्रदिवा केतुना सजूः॥२५॥ के ष्ठा नरः श्रेष्ठतमा यऽएकऽएकऽआ
यय॥ परमस्याः परावतः॥ क्व१ वोऽश्वाः क्वा३भीशवः कथं शेक कथा
यय॥ पृष्ठे सदो नसोर्यमः॥ जघने चोदऽएषां वि सक्थानि नरो यमुः ११

सं.च. पुत्रकृथे न जनयः ॥ परावीरास एतन मर्यासो भद्रजानयः ॥ अग्नितपो य
थासथ ॥ सनत्साश्व्यं पशुमुत गव्यं शतावयं ॥ श्यावाश्वस्तुताय या दो
र्वीरायोपबर्बृहत् ॥ २६ ॥ उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी ॥ अदे
वत्रादराधसः ॥ वि या जानाति जसुरिं वि तृष्यंतं वि कामिनं ॥ देवत्रा कृणु
ते मनः ॥ उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः ॥ स वैरदेय इत्समः ॥
उत मेरपद्युवतिर्ममंदुषी प्रति श्यावाय वर्तनिं ॥ वि रोहिता पुरुमीळ्हा
य येमतुर्विप्राय दीर्घयशसे ॥ यो मे धेनूनां शतं वैददश्विर्यथा ददत् ॥ ॥४३॥
तरंत इव मंहना ॥ २७ ॥ य ईं वहंत आशुभिः पिबंतो मदिरं मधु ॥ अत्र

श्रवांसि दधिरे ॥ येषां श्रियाधि रोदसी विभ्राजंते रथेष्वा ॥ दिवि रुक्म
इवोपरि ॥ युवा स मारुतो गणस्त्वेषरथो अनेद्यः ॥ शुभंयावाप्रतिष्कुतः ॥
को वेद नूनमेषां यत्रा मदंति धूतयः ॥ ऋतजाता अरेपसः ॥ यूयं मर्तं
विपन्यवः प्रणेतार इत्था धिया ॥ श्रोतारो यामहूतिषु ॥ २८ ॥ ते नो वसूनि
काम्या पुरुश्चंद्रा रिशादसः ॥ आ यज्ञियासो ववृत्तन ॥ एतं मे स्तोममूर्म्ये
दार्भ्याय परा वह ॥ गिरो देवि रथीरिव ॥ उत मे वोचतादिति सुतसोमे रथ
वीतौ ॥ न कामो अप वेति मे ॥ एष क्षेति रथवीतिर्मघवा गोमतीरनु ॥
पर्वतेष्वपश्रितः ॥ २९ ॥ ऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र रम१

॥संच॥ विमुचंत्यश्वान्॥दशशतासहतस्थुस्तदेकंदेवानांश्रेष्ठंवपुषामप
श्यं॥तत्सुवांमित्रावरुणामहित्वमीर्मातस्थुषीरहभिर्दुदुह्रे॥विश्वाः
पिन्वथःस्वसरस्यधेनाअनुवामेकःपविराववर्त॥अधारयतंपृथिवी
मुतद्यांमित्रराजानावरुणामहोभिः॥वर्द्धयतमोषधीःपिन्वतंगाअव ॥सम॥
वृष्टिंसृजतंजीरदानू॥आवामश्वासःसुयुजोवहंतुयतरश्मयउपयं
त्वर्वाक्॥घृतस्यनिर्णिगनुवर्ततेवामुपसिंधवःप्रदिविक्षरंति॥अ
नुश्रुतामतिंवर्द्धदुर्वींबर्हिरिवयजुषारक्षमाणा॥नमस्वंताधृतद ॥५२॥
क्षाधिगर्तेमित्रासाथेवरुणेळास्वंतः॥३॥अक्रविहस्तासुकृतेप

॥ऋतस्यसप्तश्रुतार्चनानानाजागतंवरुणपंक्त्यंतंतुपंश्चिकेनषड्रातह
व्यआचिकितानानुष्टुभंतुबळित्थापंचयतःऽप्रवोगायत्रंत्रीरोच
नात्यनुष्टुभमुरुचक्रिःऽपुरूरुणागायत्रंत्वानरस्तृचंबाहुवृक्तआमि
त्रऔक्षिहंयदद्यद्दशपौरआश्विनंतृदानुष्टुभंतुकूष्ठःऽप्रातिनवा
वस्युःऽपांक्तमाभातिपंचाविःऽप्रातर्यावाणाश्विनौनवसप्तवधि
स्त्रयस्त्रिगादिचतुर्थीत्रिष्टुप्पंचानुष्टुभौःस्याक्पंचगर्भस्त्राविण्युउ
पनिषन्महेदशसत्यश्रवाउषस्यंतुपांक्तंसुतघामानंषऊंजनेपंच
श्यावाश्वस्सावित्रंतुजागतंतत्सवितुर्नवगायत्रमाद्यानुष्टुबःऽरुद
शात्रिःऽपार्जन्यमुपाद्यास्तिस्रोजगत्सऊपांतस्यानुष्टुबळित्थातृचंपा

सं॰च॰४ र्थिवमानुष्टुभं प्रसम्राजेष्टौ वारुणमिंद्राग्नीषट्कैंद्राग्नमानुष्टुभं वि
४३ राट् पूर्वां नित्रप्रवोन वैवया मरुन्मारुतमग्निर्जागतं बार्हस्पत्यो भारद्वा
ज षष्ठं मंडलमपश्यत्स्वंस्य ग्नेसप्तोना॥ ४॥२८॥ ॥हरिः ॐ ऋतस्य
गोपावधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि॥ यमत्र मित्रावरु
णावथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः॥ सम्राजावस्य भुवनस्य
राजथो मित्रावरुणा विदथे स्वर्दृशा॥ वृष्टिं वां राधो अमृतत्वमीम
हे द्यावापृथिवी विचरंति तन्यवः॥ सम्राजा उग्रा वृषभा दिवस्पती पृ
थिव्या मित्रावरुणा विचर्षणी॥ चित्रेभिरभ्रैरुप तिष्ठथो रवं द्यां वर्ष
यथो असुरस्य मायया॥ माया वां मित्रावरुणा दिवि श्रिता सूर्यो ज्यो ४३

तिश्चरति चित्रमायुधं॥ तमभ्रेण वृष्ट्या गूहथो दिवि पर्जन्य द्रप्सा
मधुमंत ईरते॥ रथं युंजते मरुतः शुभे सुखं शूरो न मित्रावरुणा
गविष्टिषु॥ रजांसि चित्रा विचरंति तन्यवो दिवः सम्राजा पयसा
न उक्षतं॥ वाचं सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां वदति त्वि
षीमतीं॥ अभ्रा वसत मरुतः सु मायया द्यां वर्षयतमरुणामरेप
सं॥ धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया
॥ ऋतेन विश्वं भुवनं विराजथः सूर्यमा धत्थो दिवि चित्र्यं रथं॥ १॥
वरुणं वो रिशादसमृचा मित्रं हवामहे॥ परि व्रजेव बाह्वोर्जगन्वां
सा स्वर्णरं॥ ता बाहवा सुचेतुना प्र यंतमस्मा अर्चते॥ शेवं हि जा

सं॰च॰४ र्यंवांविश्वासुक्षासुजोगुवे॥यन्नूनमश्यांगतिंमित्रस्ययायां
४४ पथा॥अस्यप्रियस्यशर्मण्यहिंसानस्यसश्चिरे॥युवाभ्यांमित्रा
वरुणोपमंधेयामृचा॥यद्धक्षयेमघोनांस्तोतॄणांचस्पूर्धसे॥आ
नोमित्रसुदीतिभिर्वरुणश्चसधस्थआ॥स्वेक्षयेमघोनांसखी
नांचवृधसे॥युवंनोयेषुवरुणक्षत्रंबृहच्चबिभृथः॥उरुणोवाज
सातयेकृतंरायेस्वस्तये॥उच्छंत्यांमेयजतादेवक्षत्रेरुशद्गवि॥
सुतंसोमंनहस्तिभिरापड्भिर्धावतंनराबिभ्रतावर्चनानसं॥२॥य
श्चिकेतससुक्रतुर्देवत्रासब्रवीतुनः॥वरुणोयस्यदर्शतोमित्रो
वावनतेगिरः॥ताहिश्रेष्ठवर्चसाराजानादीर्घश्रुत्तमा॥तास ४४

त्पतीऋतावृधऋतावानाजनेजने॥तावामियानोवसेपूर्वाउप
ब्रुवेसचा॥स्वश्वासःसुचेतुनावाजांअभिप्रदावने॥मित्रोअंहो
श्चिदादुरुक्षयायगातुंवनते॥मित्रस्यहिप्रतूर्वतःसुमतिरस्तिवि
धतः॥वयंमित्रस्यावसिस्यामसप्रथस्तमे॥अनेहसस्त्वोतयःस
त्रावरुणशेषसः॥युवंमित्रेमंजनंयतथःसंचनयथः॥मामघो
नःपरिख्यतंमोअस्माकमृषीणांगोपीथेनउरुष्यतं॥३॥आचि
कितानसुक्रतूदेवौमर्तरिशादसा॥वरुणायऋतपेशसेदधीतप्र
यसेमहे॥ताहिक्षत्रमविह्रुतंसम्यगसुर्य१माशाते॥अधव्रतेव
मानुषंस्व१र्णधायिदर्शतं॥तावामेषेरथानामुर्वींगव्यूतिमेषां॥ता

मं०५०४ तहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे ॥ अधा हि काव्या युवं दक्ष
स्य पूर्भिरद्भुता ॥ नि केतुना जनानां चिकेथे पूतदक्षसा ॥ तदृतं पृथि
४५ वि बृहच्छ्रवएष ऋषीणां ॥ ज्रयसानावरं पृथ्वतिक्षरंति यामभिः
आ यद्वामीयचक्षसा मित्र वयं च सूरयः ॥ व्यचिष्ठे बहुपाय्ये यते
महि स्वराज्ये ॥ ४ ॥ बळित्था देव निष्कृतमादित्या यजतं बृहत् ॥
वरुण मित्रार्यमन्वर्षिष्ठं क्षत्रमाशाथे ॥ आ यद्योनिं हिरण्ययं व
रुण मित्र सदथः ॥ धर्तारा चर्षणीनां यंतं सुम्नं रिशादसा ॥ वि
श्वे हि विश्ववेदसो वरुणो मित्रो अर्यमा ॥ व्रता पदेव सश्चिरे पांति
मर्त्यं रिषः ॥ ते हि सत्या ऋतस्पृश ऋतावानो जनेजने ॥ सुनीथासः ४५

सुदानवोंहोश्चिदुरुचक्रयः ॥ को नु वां मित्रास्तुतो वरुणो वा तनू
नां ॥ तत्सु वामेषते मतिरत्रिभ्य एषते मतिः ॥ ५ ॥ प्र वो मित्राय गा
यत वरुणाय विपा गिरा ॥ महिक्षत्रावृतं बृहत् ॥ सम्राजा या घृत
योनी मित्रश्चोभा वरुणश्च ॥ देवा देवेषु प्रशस्ता ॥ ता नः शक्तं पार्थि
वस्य महो रायो दिव्यस्य ॥ महि वां क्षत्रं देवेषु ॥ ऋतमृतेन सपंता इषिरं
दक्षमाशाते ॥ अद्रुहा देवौ वर्धेते ॥ वृष्टिद्यावा रीत्यापेषस्पती दानु
मत्याः ॥ बृहंतं गर्तमाशाते ॥ ६ ॥ त्री रोचना वरुण त्रींरुत द्यून्त्री
णि मित्र धारयथो रजांसि ॥ वावृधानावमतिं क्षत्रियस्यानु व्रतं
रक्षमाणावजुर्यं ॥ इरावतीर्वरुण धेनवो वां मधुमद्वां सिंधवो मित्र

सं०च०४ दुह्रे॥ त्रयस्तस्थुर्वृषभासस्तिसृणां धिषणानां रेतोधा वि द्युमं
४६ तः॥ प्रातर्देवीमदितिं जोहवीमि मध्यंदिन उदिता सूर्यस्य॥ रा
ये मित्रावरुणा सर्वताते ळे तोकाय तनयाय शं योः॥ या धर्तारा र
जसो रोचनस्योतादित्या दिव्या पार्थिवस्य॥ न वां देवा अमृता आ
मिनंति व्रतानि मित्रावरुणा ध्रुवाणि॥ ७॥ पुरूरुणा चिद्ध्यस्त्यवो
नूनं वां वरुण॥ मित्र वंसि वां सुमतिं॥ ता वां सम्यगद्रुह्वाणेषमश्या
म धायसे॥ वयं ते रुद्रा स्याम॥ पातं नो रुद्रा पायुभिरुत त्रायेथां सु
त्रात्रा॥ तुर्याम दस्यून्तनूभिः॥ मा कस्याद्भुतक्रतू यक्षं भुजेमा तनू
भिः॥ मा शेषसा मा तनसा॥ ८॥ आ नो गंतं रिशादसा वरुण मित्र ४६

बर्हणा॥ उपेमं चारुमध्वरं॥ विश्वस्य हि प्रचेतसा वरुण मित्र रा
जथः॥ ईशाना पिप्यतं धियः॥ उप नः सुतमा गतं वरुण मित्र दाशु
षः॥ अस्य सोमस्य पीतये॥ ९॥ आ मित्रे वरुणे वयं गीर्भिर्जुहुमो
अत्रिवत्॥ नि बर्हिषि सदतं सोमपीतये॥ व्रतेन स्थो ध्रुवक्षेमा ध
र्मणा यातयज्जना॥ नि बर्हिषि॥०॥ मित्रश्च नो वरुणश्च जुषेतां य
ज्ञमिष्टये॥ नि बर्हिषि सदतां सोमपीतये॥ १०॥ यदद्य स्थः परावति
यदर्वावत्यश्विना॥ यद्वा पुरू पुरुभुजा यदंतरिक्ष आ गतं॥ इह त्या पु
रुभूतमा पुरू दंसांसि बिभ्रता॥ वरस्या याम्यध्रिगू हुवे तुविष्टमा भु
जे॥ ईर्मान्यद्वपुषे वपुश्चक्रं रथस्य येमथुः॥ पर्यन्या नाहुषा युगा

सं०च०४ मक्षू रजांसि दीयथः॥ नदू षु वामेनाकृतं विश्वा यद्वामनु ष्टुवे॥
५७ नानाजाताववेपसा समस्मे बंधुमेयथुः॥ आ यद्वां सूर्या रथं ति-
ष्ठद्रघुष्यदं सदा॥ परि वामरुषा वयो घृणा वरंत आतपः॥११॥ यु-
वोरत्रिश्चिकेतति नरा सुम्नेन चेतसा॥ घर्मं यद्वामरेपसं नासत्या-
स्ना भुरण्यति॥ उग्रो वां ककुहो ययिः शृण्वे यामेषु संतनिः॥ यद्वां
दंसोभिरश्विनात्रिर्नराववर्तति॥ मध्व ऊ षु मधूयुवा रुद्रा सिषक्ति
पिप्युषी॥ यत्समुद्राति पर्षथः पक्वाः पृक्षो भरंत वां॥ सत्यमिद्वा उ
अश्विना युवामाहुर्मयोभुवा॥ ता यामन्यामहूतमा यामन्ना मृ-
ळयत्तमा॥ इमा ब्रह्माणि वर्धनाश्विभ्यां संतु शंतमा॥ या तक्षा- ५७

म रथाँ इवावोचाम बृहन्नमः॥१२॥ कूष्ठो देवावश्विनाद्या दिवो
मनावसू॥ तच्छ्रवथो वृषण्वसू अत्रिर्वामा विवासति॥ कुह त्या कु-
ह नु श्रुता दिवि देवा नासत्या॥ कस्मिन्ना यतथो जने को वां नदीनां स-
चा॥ कं याथः कं ह गच्छथः कमच्छा युंजाथे रथं॥ कस्य ब्रह्माणि र-
ण्यथो वयं वामुश्मसीष्टये॥ पौरं चिद्ध्युदप्रुतं पौर पौराय जिन्वथः
॥ यदीं गृभीततातये सिंहमिव द्रुहस्पदे॥ प्र च्यवानाज्जुजुरुषो व-
व्रिमत्कं न मुंचथः॥ युवा यदी कृथः पुनरा काममृण्वे वध्वः॥१३॥
अस्ति हि वामिह स्तोता स्मसि वां संदृशि श्रिये॥ नू श्रुतं म आ गतम-
वोभिर्वाजिनीवसू॥ को वामद्य पुरूणामा वव्ने मर्त्यानां॥ को वि-

प्रो विप्रवाहसा को यज्ञैर्वाजिनीवसू ।। आ वां रथो रथानां येष्ठो
यात्वश्विना ।। पुरू चिदस्मयुस्तिर आंगूषो मर्त्येष्वा ।। शमू षु वां म
धूयुवास्माकमस्तु चर्कृतिः ।। अर्वाचीना विचेतसा विभिः श्येनेव दी
यतं ।। अश्विना यद्ध कर्हि चिच्छुश्रूयातमिमं हवं ।। वस्वीरू षु वां भुजः
पृंचंति सु वां पृचः ।।१४।। प्रति प्रियतमं रथं वृषणं वसुवाहनं ।। स्तोता वा
मश्विनावृषिः स्तोमेन प्रति भूषति माध्वी मम श्रुतं हवं ।। अत्यायातम
श्विना तिरो विश्वा अहं सना ।। दस्रा हिरण्यवर्तनी सुषुम्ना सिंधुवाह
सा माध्वी मम ।०। आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवं ।। रुद्रा हि
रण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम ।०। सुष्टुभो वां वृषण्वसू

रथे वाणीच्याहिता ।। उत वां ककुहो मृगः पृक्षः कृणोति वापु
षो माध्वी मम ।०। बोधिन्मनसा रथ्येषिरा हवनश्रुता ।। विभिश्च्य
वानमश्विना नि याथो अद्वयाविनं माध्वी मम ।०।।१५।। आ वां
नरा मनोयुजोश्वासः प्रुषितप्सवः ।। वयो वहंतु पीतये सह सुम्ने
भिरश्विना माध्वी मम ।०। अश्विनावेह गच्छतं नासत्या मा वि वेन
तं ।। तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या माध्वी मम ।०। अस्मि
न्यज्ञे अदाभ्या जरितारं शुभस्पती ।। अवस्युमश्विना युवं गृणंत
मुप भूषथो माध्वी मम ।०। अभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः ।।
अयोजि वां वृषण्वसू रथो दस्रावमर्त्यो माध्वी मम ।०।।१६।। आ मा

सं०च०४ ग्निरुषसामनीकमुद्विप्राणांदेवयावाचोअस्थुः॥अर्वाञ्चानूनं
४९ रथ्येहयातंपीपिवांसमश्विनाघर्ममछ॥नसंस्कृतंप्रमिमीतोगमि
ष्ठांतिनूनमश्विनोपस्तुतेह॥दिवाभिपित्वेवसागमिष्ठाप्रत्यवर्तिं
दाशुषेशंभविष्ठा॥उतायातंसंगवेप्रातरह्नोमध्यंदिनउदितासूर्यस्य
॥दिवानक्तमवसाशंतमेननेदानींपीतिरश्विनाततान॥इदंहिवांप्रदि
विस्थानमोकइमेगृहाअश्विनेदंदुरोणं॥आनोदिवोबृहतःपर्वतादा
द्भ्योयातमिषमूर्जंवहंता॥समश्विनोरवसानूतनेनमयोभुवासुप्र
णीतीगमेम॥आनोरयिंवहतमोतवीरामाविश्वान्यमृतासौभगा
नि॥१७॥प्रातर्यावाणाप्रथमायजध्वंपुरागृध्रादररुषःपिबातः॥ ५९

प्रातर्हियज्ञमश्विनादधातेप्रशंसंतिकवयःपूर्वभाजः॥प्रातर्य
जध्वमश्विनाहिनोतनसायमस्तिदेवयाअजुष्टं॥उतान्योअस्म
द्यजतेविचावःपूर्वःपूर्वोयजमानोवनीयान्॥हिरण्यत्वङ्मधु
वर्णोघृतस्नुःपृक्षोवहन्नारथोवर्ततेवां॥मनोजवाअश्विनावा
तरंहायेनातियाथोदुरितानिविश्वा॥योभूयिष्ठंनासत्याभ्यांवि
वेषचनिष्ठंपित्वोररतेविभागे॥सतोकमस्यपीपरच्छमीभिरनू
र्ध्वभासःसदमित्तुतुर्यात्॥समश्विनो।०॥१८॥अश्विनावेहमग
छतंनासत्यामाविवेनतं॥हंसाविवपततमासुताँउप॥अश्विनाह
रिणाविवगौराविवानुयवसं॥हंसाविव॥०॥अश्विनावाजिनीव

सं०च०४ सुतुषेथां यज्ञमिष्टये॥ हंसा।०॥ अत्रिर्यद्वामवरोहन्नृबीसमजोह
५० वीन्नाधमानेव योषा॥ श्येनस्य चिज्जवसा नूतनेनागछतमश्विना शं
तमेन॥१९॥ विजिहीष्व वनस्पते योनिः सूष्यंत्या इव॥ श्रुतं मे अश्वि
ना हवं सप्तवध्रिं च मुंचतं॥ भीताय नाधमानाय ऋषये सप्तवध्रये॥
मायाभिरश्विना युवं वृक्षं सं च वि चाचथः॥ यथा वातः पुष्करिणीं समिं
गयति सर्वतः॥ एवा ते गर्भ एजतु निरैतु दशमास्यः॥ यथा वातो य
था वनं यथा समुद्र एजति॥ एवा त्वं दशमास्य सहावेहि जरायुणा
॥ दश मासां छशयानः कुमारो अधि मातरि॥ निरैतु जीवो अक्ष
तो जीवो जीवंत्या अधि॥२०॥ महे नो अद्य बोधयोषो राये दिवि ५०

त्मती॥ यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्व
सूनृते॥ या सुनीथे शौचद्रथे व्यौछो दुहितर्दिवः॥ सा व्युछ स
हीयसि सत्यश्रवसि।०॥ सा नो अद्याभरद्वसुर्व्युछा दुहितर्दिवः
॥ यो व्यौछः सहीयसि स।०॥ अभि ये त्वा विभावरि स्तोमैर्गृणंति
वह्नयः॥ मघैर्मघोनि सुश्रियो दामन्वंतः सुरातयः सुजाते अश्व
सूनृते॥ यच्चिद्धि ते गणा इमे छदयंति मघत्तये॥ परि चिद्वष्टयो द
धुर्ददतो राधो अह्रयं सुजाते।०॥२१॥ ऐषु धा वीरवद्यश उषो म
घोनि सूरिषु॥ ये नो राधांस्यह्रया मघवानो अरासत सुजाते।०॥
तेभ्यो द्युम्नं बृहद्यश उषो मघोन्या वह॥ ये नो राधांस्यश्व्या गव्या

सं०च०४ भजंतसूरयःसुजाते।०। उतनोगोमतीरिषआवहादुहितर्दिवः॥
५१ साकंसूर्यस्यरश्मिभिःशुभ्रैःशोचद्भिरर्चिभिःसुजाते।०। व्युछादु
हितर्दिवोमाचिरंतनुथाअपः॥ नेत्त्वास्तेनंयथारिपुंतपातिसूरोअ
र्चिषासुजाते।०। एतावद्वेदुषस्त्वंभूयोवादातुमर्हसि॥ यास्तोतृभ्यो
विभावर्युछंतीनप्रमीयसेसुजाते।०॥२२॥ द्युतद्यामानंबृहतीमृ
तेनऋतावरीमरुणप्सुंविभातीं॥ देवीमुषसंस्वरावहंतींप्रतिवि
प्रासोमतिभिर्जरंते॥ एषाजनंदर्शताबोधयंतीसुगान्पथःकृ
ण्वतीयात्यग्रे॥ बृहद्रथाबृहतीविश्वमिन्वोषाज्योतिर्यछत्य
ग्रेअह्नां॥ एषागोभिररुणेभिर्युजानोस्रेधंतीरयिमप्रायुचक्रे॥ ५१

पथोरदंतीसुवितायदेवीपुरुष्टुताविश्ववाराविभाति॥ एषाव्येनी
भवतिद्विबर्हाआविष्कृण्वानातन्वंपुरस्तात्॥ ऋतस्यपंथामन्वेतिसा
धुप्रजानतीवनदिशोमिनाति॥ एषाशुभ्रानतन्वोविदानोर्ध्वेव
स्नातीदृशयेनोअस्थात्॥ अपद्वेषोबाधमानातमांस्युषादिवोदु
हिताज्योतिषागात्॥ एषाप्रतीचीदुहितादिवोनॄन्योषेवभद्रानि
रिणीतेअप्सः॥ व्यूर्ण्वतीदाशुषेवार्याणिपुनर्ज्योतिर्युवतिःपूर्वथा
कः॥२३॥ युंजतेमनउतयुंजतेधियोविप्राविप्रस्यबृहतोविपश्चि
तः॥ विहोत्रादधेवयुनाविदेकइन्महीदेवस्यसवितुःपरिष्टुतिः॥ वि
श्वारूपाणिप्रतिमुंचतेकविःप्रासावीद्भद्रंद्विपदेचतुष्पदे॥ विना

सं०च०४ कमस्मत्सविता वरेण्योनु प्रयाणमुषसो विराजति॥ यस्य प्रयाणम
५२ न्वन्य इद्ययुर्देवा देवस्य महिमानमोजसा॥ यः पार्थिवानि विममे स
एतशो रजांसि देवः सविता महित्वना॥ उत यासि सवितस्त्रीणि रो
चनोत सूर्यस्य रश्मिभिः समुच्यसि॥ उत रात्रीमुभयतः परीयस उत
मित्रो भवसि देव धर्मभिः॥ उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भव
सि देव यामभिः॥ उतेदं विश्वं भुवनं विराजसि श्यावाश्वस्ते सवित स्तो
ममानशे॥२४॥ तत्सवितुर्वृणीमहे वयं देवस्य भोजनं॥ श्रेष्ठं स
र्वधातमं तुरं भगस्य धीमहि॥ अस्य हि स्वयशस्तरं सवितुः कच्चन
प्रियं॥ न मिनंति स्वराज्यं॥ स हि रत्नानि दाशुषे सुवाति सविता भ ५२

गः॥ तं भागं चित्रमीमहे॥ अद्या नो देव सवितः प्रजावत्सावीः सौ
भगं॥ परा दुःष्वप्न्यं सुव॥ विश्वानि देव सवितर्दुरितानि परा सुव
॥ यद्भद्रं तन्न आ सुव॥२५॥ अनागसो अदितये देवस्य सवितुः स
वे॥ विश्वा वामानि धीमहि॥ आ विश्वदेवं सत्पतिं सूक्तैरद्या वृणी
महे॥ सत्यसवं सवितारं॥ य इमे उभे अहनी पुर एत्यप्रयुच्छन्॥
स्वाधीर्देवः सविता॥ य इमा विश्वा जातान्याश्रावयति श्लोकेन॥
प्र च सुवाति सविता॥२६॥ अच्छा वद तवसं गीर्भिराभिस्तुहि पर्ज
न्यं नमसा विवास॥ कनिक्रदद्वृषभो जीरदानू रेतो दधात्योषधी
षु गर्भं॥ वि वृक्षान्हंत्युत हंति रक्षसो विश्वं बिभाय भुवनं महाव

सं०च०४ धात्॥उतानागाईषतेवृष्ण्यावतोयत्पर्जन्यस्तनयन्हंतिदुष्कृतः
॥रथीवकशयाश्वाँअभिक्षिपन्नाविर्दूतान्कृणुतेवर्ष्याँ३अह॥दूरा
५३ त्सिंहस्यस्तनथाउदीरतेयत्पर्जन्यःकृणुतेवर्ष्यं१नभः॥प्रवातावां
तिपतयंतिविद्युतउदोषधीर्जिहतेपिन्वतेस्वः॥इराविश्वस्मैभुव
नायजायतेयत्पर्जन्यःपृथिवींरेतसावति॥यस्यव्रतेपृथिवीनन्न
मीतियस्यव्रतेशफवज्जर्भुरीति॥यस्यव्रतओषधीर्विश्वरूपाः
सनःपर्जन्यमहिशर्मयच्छ॥२७॥दिवोनोवृष्टिंमरुतोररीध्वंप्रपि
न्वतवृष्णोअश्वस्यधाराः॥अर्वाङेतेनस्तनयित्नुनेह्यपोनिषिं
चन्नसुरःपितानः॥अभिक्रंदस्तनयगर्भमाधाउदन्वतापरिदी ५२

यारथेन॥दृतिंसुकर्षविषितंन्यंचंसमाभवंतूद्वतोनिपादाः॥म
हांतंकोशमुदचानिषिंचस्यंदंतांकुल्याविषिताःपुरस्तात्॥घृते
नद्यावापृथिवीव्युंधिसुप्रपाणंभवत्वघ्न्याभ्यः॥यत्पर्जन्यकनि
क्रदत्स्तनयन्हंसिदुष्कृतः॥प्रतीदंविश्वंमोदतेयत्किंचपृथिव्या
मधि॥अवर्षीर्वर्षमुदुषूगृभायाकर्धन्वान्यत्येतवाउ॥अजी
जनओषधीर्भोजनायकमुतप्रजाभ्योविदोमनीषां॥२८॥बळि
त्थापर्वतानांखिद्रंबिभर्षिपृथिवि॥प्रयाभूमिंप्रवत्वतिमह्नाजि
नोषिमहिनि॥स्तोमासस्त्वाविचारिणिप्रतिष्टोभंत्यक्तुभिः॥प्रया
वाजंनहेषंतंपेरुमस्यस्यर्जुनि॥दृळ्हाचिद्यावनस्पतीन्क्ष्मयादर्धर्

सं०च०४ र्व्योजसा॥ यत्ते अभ्रस्य विद्युतो दिवो वर्षन्ति वृष्टयः॥ वर्षन्तु ते
५४ विभावरि दिवो अभ्रस्य विद्युतः॥ रोहन्तु सर्वबीजान्यव ब्रह्मद्विषो
जहि॥२९॥ प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुताय
॥ वि यो जघान शमितेव चर्मोपस्तिरे पृथिवीं सूर्याय॥ वनेषु व्य
१न्तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु॥ हृत्सु क्रतुं वरुणो
अप्स्व१ग्निं दिवि सूर्यमदधात्सोममद्रौ॥ नीचीनबारं वरुणः क
वन्धं प्र ससर्ज रोदसी अंतरिक्षं॥ तेन विश्वस्य भुवनस्य राजा य
वं न वृष्टिर्व्युनत्ति भूम॥ उनत्ति भूमिं पृथिवीमुत द्यां यदा दुग्धं व
रुणो वष्ट्यादित्॥ समभ्रेण वसत पर्वतास्तविषीयंतः श्रथयं ५४

त वीराः॥ इमामू ष्वासुरस्य श्रुतस्य महीं मायां वरुणस्य प्र वोचं॥
मानेनेव तस्थिवाँ अंतरिक्षे वि यो ममे पृथिवीं सूर्येण॥३०॥ इमामू
नु कवितमस्य मायां महीं देवस्य नकिरा दधर्ष॥ एकं यदुद्ना न पृणं
त्येनीरासिंचंतीरवनयः समुद्रं॥ अर्यम्यं वरुण मित्र्यं वा सखायं वा
सदमिद्भ्रातरं वा॥ वेशं वा नित्यं वरुणारणं वा यत्सीमागश्चकृ
मा शिश्रथस्तत्॥ कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न
विद्म॥ सर्वा ता विष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः॥३१॥
इंद्राग्नी यमवथ उभा वाजेषु मर्त्यं॥ दृळ्हा चित्स प्र भेदति द्युम्ना वा
णीरिव त्रितः॥ या पृतनासु दुष्टरा या वाजेषु श्रवाय्या॥ या पंच चर्ष

सं०च०४ णीरभींद्राग्नी ता हवामहे ॥ तयोरिदमवच्छवस्तिग्मा दिद्युन्मघोनोः
५५ ॥ प्रति द्रुणा गभस्त्योर्गवां वृत्रघ्न एषते ॥ ता वामेषे रथानामिंद्राग्नी
हवामहे ॥ पती तुरस्य राधसो विद्वांसा गिर्वणस्तमा ॥ ता वृधंतावनु
द्यून्मर्ताय देवावदभा ॥ अर्हंता चित्पुरो दधेंऽशेव देवावर्वते ॥ एवेंद्रा
ग्निभ्यामहावि हव्यं शूष्यं घृतं न पूतमद्रिभिः ॥ ता सूरिषु श्रवो बृह
द्रयिं गृणत्सु दिधृतमिषं गृणत्सु दिधृतं ॥ ३२ ॥ प्र वो महे मतयो यंतु
विष्णवे मरुत्वते गिरिजा एवयामरुत् ॥ प्र शर्धाय प्रयज्यवे सुखादये
तवसे भंददिष्टये धुनिव्रताय शवसे ॥ प्र ये जाता महिना ये च नु स्वयं
प्र विद्मना ब्रुवत एवयामरुत् ॥ क्रत्वा तद्वो मरुतो नाधृषे शवो दा ५५

ना मह्ना तदेषामधृष्टासो नाद्रयः ॥ प्र ये दिवो बृहतः शृण्विरे गिरा सु
शुक्वानः सुभ्व एवयामरुत् ॥ न येषामिरी सधस्थ ईष्ट आँ अग्नयो न स्व
विद्युतः प्र स्पंद्रासो धुनीनां ॥ स चक्रमे महतो निरुरुक्रमः समानस्मा
त्सदस एवयामरुत् ॥ यदायुक्त त्मना स्वादधि ष्णुभिर्विष्पर्धसो विम
हसो जिगाति शेवृधो नृभिः ॥ स्वनो न वोऽमवान्रेजयद्वृषा त्वेषो ययिस्त
विष एवयामरुत् ॥ येना सहंत ऋंजत स्वरोचिषः स्थारश्मानो हिरण्य
याः स्वायुधास इष्मिणः ॥ ३३ ॥ अपारो वो महिमा वृद्धशवसस्त्वेषं शवो
ऽवत्वेवयामरुत् ॥ स्थातारो हि प्रसितौ संदृशि स्थन ते न उरुष्यता निदः शु
शुक्वांसो नाग्नयः ॥ ते रुद्रासः सुमखा अग्नयो यथा तुविद्युम्ना अवं

सं॰ च॰ ४ त्वेषयामरुत् ॥ दीर्घंपृथुपप्रथेसद्मपार्थिवंयेषामज्मेष्वामहःशर्धो
५५ स्पद्रुतैनसां ॥ अद्वेषोनोमरुतोगातुमेतनश्रोताहवंजरितुरेवया
मरुत् ॥ विष्णोर्महःसमन्यवोयुयोतनस्मद्रथ्यो३नदंसनापद्वेषांसि
सनुतः ॥ गंतानोयज्ञंयज्ञियाःसुशमिश्रोताहवमरक्षएवयामरुत् ॥ ज्ये
ष्ठासोनपर्वतासोव्योमनियूयंतस्यप्रचेतसःस्यातदुर्धर्तवोनिदः ॥ ३४
॥ ॥ इतिपंचमंमंडळं ॥ ॥ त्वंह्यग्नेप्रथमोमनोतास्याधियोअभवोद
स्महोता ॥ त्वंसींवृषन्नकृणोर्दुष्टरीतुसहोविश्वस्मैसहसेसहध्यै ॥
अधाहोतान्यसीदोयजीयानिळस्पदइषयन्नीड्यःसन् ॥ तंत्वानरः
प्रथमंदेवयंतोमहोरायेचितयंतोअनुग्मन् ॥ वृतेवयंतंबहुभिर्वस ५६